# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः -30-08-2020 अङ्काः - 100

पूर्वाह्णे – 10:**00**वादनतः **1**:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि</u>

**1 पञ्चानां एकवाक्येन उत्तरं लिखत ।** 5

१. आनन्दगिरिः कः ?

२. इन्द्रसारथिः कः ?

३. वित्तस्य कति गतयः सन्ति ?

४. देवव्रतः कः ?

५. साकेतपुर्याः अपरं नाम किम् ?

६. विष्णुस्तुतौ के भगवन्तम् अस्तुवन् ?

७. हनुमान् कस्मिन् काले लङ्कां प्रविष्टः ?

८. नलः कः ?

**2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. शङ्करावतारसमये सत्त्वाः वृक्षाश्च कथम् आसन् ?

२. भगवतः सप्तत्वसम्बन्धं विशदयत ?

३. मृगावतीं तुण्डेन आदाय उड्डीनः गरुडः किम् अकरोत् ?

४. कुन्त्याः सेवया प्रीतः दुर्वासाः तां किमाह ?

५. नलाकारान् पञ्चपुरुषान् दृष्टवा भैमी किम् अकरोत् ?

६. शृङ्गगिरौ शङ्करः किम् अपश्यत् ? तेन सः किम् अचिन्तयत् ?

७. भीष्मेण स्वपरिचयं पृष्टः द्रोणः तं किम् अवदत् ?

3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत । 8

१. रघोरौदार्यं विशदयत ।

२. हस्तामलकस्य पूर्ववृत्तम् वर्णयत ।

३. हस्तिनापुरमागतान् पाण्डवान् दृष्ट्वा नागराः किमतर्कयन् ?

४. वाल्मीकिकृतचन्द्रोदयवर्णनं कुरुत।

4वाक्यत्रयं सप्रसङ्गं विवृणुत । 9

१. स्त्रीणां निसर्गसिद्धा हि निपुणता ।

२. विशिष्टयोस्सम्बन्धो हि गुणवान् भवति ।

३. मयि घोषवती नाम वीणा अस्ति ।

४. शरद्घनं नार्दति चातकोऽपि ।

५. भगवन्, अस्ति मे भवतः सूत्रभाष्यस्य वार्तिककरणाभिलाषः ।

5 द्वयोः भावं विशदयत । 8

१. यः प्रीणयेत् सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यत्
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

२. लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥

३. निर्बन्धसञ्जातरुषाऽर्थकार्श्यम् अचिन्तयित्वा गुरुणाऽहमुक्तः ।
वित्तस्य विद्यापरिसङ्ख्यया मे कोटीश्चतस्रो दश चाहरेति ॥

**6 श्लोकमेकंपूर्णं लिखत ।** 4

१. यद्वात्रा ____________ जलम् ।। २. एते सत्पुरुषाः ______ जानीमहे ॥

**7. एकस्य कवेः देशकालकृतिमहत्त्वादीनाम् विषये लिखत ।** 4

१. कालिदासः २. लक्ष्मणसूरिः

**8. एकस्य लघुटिप्पणीं लिखत ।** 4

१. एकचक्रनगरम् २. सहस्रानीकः

**9. चत्वारि पदानि वाक्ये योजयत ।** 4

१. अहर्निशम् २. कलयति ३. प्रथिता
४. विशाम्पतिः ५. विधाय ६. जन्मनि

**10. चतुर्णां रूपाणि विवेचयत ।** 4

१. पुत्रीयन् २. धक्ष्यते ३. मारितः
४. अपृच्छत् ५. हैडिम्बेयः ६. उक्त्वा

**11. चतुर्णां पर्यायपदानि लिखत ।** 4

१. पयोनिधिः २. यागः ३. मृगादनः
४. आक्रीडः ५. प्रवाहः ६. धूमकेतुः

**12. चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

१. इन्द्राग्नियमवरुणाः २. आनन्दकरः ३. पञ्चनली
४. गिरिराजः ५. व्यूढोरस्कः ६. यथाकालम्

**13. चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

१. सुप्तोत्थितः २. शिष्यांश्चोदयामास ३. वरुणादादाय
४. तच्छ्रुत्वा ५. अविच्छिन्नयाऽऽज्यधारया ६. सर्वैरपि

**14. द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

१. यतिष्ये २. ददर्श ३. ददाति ४. आरभत

**15. द्वयोः व्याकरणविशेषं लिखत ।** 4

१. व्यजयत २. मा शुचः ३. स्वस्त्यस्तु ते ४. अधिक्षिपति स्म

**16. समासमेकं सलक्ष्णं विशदयत ।** 4

१. कर्मधारयसमासः २. द्वन्द्वसमासः

**17. चतुर्थं पदं लिखत ।** 4

१. चक्रपाणिः - मुकुन्दः :: प्राप्तोदकः __________

२. हैडिम्बेयः – घटोत्कचः :: पाराशर्यः __________

३. दुहिता – दुहितृ :: दुर्वासाः __________

४. शङ्करावतारः – गुरुवंशकाव्यम् :: विष्णुस्तुतिः __________

**18. इतरवचनानि लिखत ।** 4

1.______ ______ आहुः । 2. भो मनीषिन् ! ______ ______ ।

3. अश्वत्थामा ______ ___ । 4. ______ त्रायेथाम् ______ ।

**18. रिक्तस्थानानि पूरयत ।** 4

१________न परित्यजन्ति । २. प्रायः अन्यपदार्थप्रधानः __________ ।

३. आसीद् _____ तीरे सिद्धस्समाधिनिष्ठो महात्मा । ४.________ धर्ममवाप्नुहि ।

**19. प्रयोगपरिवर्तनं कुरुत ।** 2

१. पित्रा शुश्रूषार्थम् अहं नियोजिता ।

२. देवाः स्वं रूपं गृहणन्तु ।

-------------------------

# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः **30-08-2020** अङ्काः - 50

पूर्वाह्णे –1:30 तः 3:00 पर्यन्तम् समयः – सार्धकहोरा

सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** 5

1. संस्कृतदिनाचरणम् २. आरोग्यस्यमहत्त्वम् ३. शङ्कराचार्याः

2. (अ) चतुर्थी विभक्तिः कदा भवति ? सोदाहरणं विवृणुत । 4

(आ) तिङ्-प्रत्ययाःकति सन्ति ? तिङ्-प्रत्ययान्लिखत । 4

3. (अ) अर्थान्तरन्यास-अलङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

(आ) "**विदिताखिलशास्त्रसुधाजलधे**"- एतस्य वृत्तं सलक्षणं विवृणुत। 4

**4 उत्तरं लिखत । (त्रयाणामेव)** 3

१. निर्धारणार्थे के विभक्ती प्रयोक्तुं शक्येते ?

२. प्रश्नचिह्नं कदा उपयुज्यते ? सोदाहरणं लिखत ।

३. सर्वलघुः कुत्र भवति (कस्मिन् गणे) ?

४. तुल्यार्थकशब्दयोगे उपमा वाचकस्य उपरि का विभक्तिः प्रयोक्तव्या ?

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. अत्यक्ष्यत् २.अचूचुरत् ३. बभूव ४. पेचे

**6 प्रयोगपरिवर्तनं कुरुत ।** 4

१. मृगैः त्रस्येत। २. सः मां पश्यति।

३. पुण्यकर्मणः फलं भविष्यति । ४. भवद्भिः स्थीयते।

7 **वाक्यदोषं परिहरत ।** 4

१. वृक्षाय पतति पर्णम्।

२. धिक् त्वम्।

३. हरिः वैकुण्ठे अधिशेते ।

४. कालिदासेन कृतिः रघुवंशम्।

8 **टिप्पणीं लिखत । (एकस्य)** 2

१. भावेप्रयोगः          २. आशीर्लिङ्-लकारः

9 **मातृभाषया अनूद्यत ।** 5

१. उदिते सूर्ये कृषीवलाः क्षेत्रम् अगच्छन्।

२. देवश्चेत् अवर्षिष्यत्बीजानि अवाप्स्म।

३. नवरात्रोत्सवे वयं शृङ्गेरीं यातास्मः ।

४. श्रीरामेण सर्वाः प्रजाः धर्मतत्पराः चक्रिरे।

५. अन्तरेण गुरुशुश्रूषां नावाप्यते विद्या ।

10 **संस्कृतभाषया परिवर्तयत ।** 5

1. ಸತ್ಯವಾದಿಗಳಲ್ಲಿ ಹರಿಶ್ಚಂದ್ರ ಶ್ರೇಷ್ಠ.

   Among the truthful men, Harishchandra is the greatest.

2. ಮಳೆಗಾಲಬಂದರೆ ಬಾವಿಯಲ್ಲಿ ನೀರು ಹೆಚ್ಚೀತು.

   If rainy season comes, water will raise in well.

3. ಅವರು ರಜಾದಿನಗಳಲ್ಲಿ ಹಳ್ಳಿಗೆ ಹೋಗುವರು.

   They will go to village during holidays.

4. ಹಸುಗಳು ಕರೆಯಲ್ಪಡುತ್ತಿರುವಾಗ ಅವನು ಹೋದನು.

   He went when the cows were being milked.

5. ಅವರಿಬ್ಬರಿಂದ ಶ್ರೀಕೃಷ್ಣಬಲರಾಮರನ್ನು ಗೆಲ್ಲಲು ಯತ್ನಿಸೋಣವಾಯಿತು.

   It was tried by those two to defeat SriKrishna and Balarama.

---